श्री दक्षिणकाळी हृदय स्तोत्रं (महाकौतूहलं)

श्री दक्षिणकाळी हृदय स्तोत्रं (महाकौतूहलं)

श्रीमहाकाल उवाच |
महाकौतूहलस्तोत्रं हृदयाख्यं महोत्तमं |
शृणु प्रिये महागोप्यं दक्षिणायाः सुगोपितं || 1 ||

अवाच्यमपि वक्ष्यामि तव प्रीत्या प्रकाशितं |
अन्येभ्यः कुरु गोप्यं च सत्यं सत्यं च शैलजे || 2 ||

श्रीदेव्युवाच |
कस्मिन् युगे समुत्पन्नं केन स्तोत्रं कृतं पुरा |
तत्सर्वं कथ्यतां शंभो महेश्वर दयानिधे || 3 ||

श्रीमहाकाल उवाच |
पुरा प्रजापतेः शीर्षच्छेदनं कृतवानहं |
ब्रह्महत्याकृतैः पापैर्भैरवत्वं ममागतं || 4 ||
ब्रह्महत्या विनाशाय कृतं स्तोत्रं मया प्रिये |
कृत्यारिनाशकं स्तोत्रं ब्रह्महत्यापहारकं || 5 ||

अस्य श्री दक्षिणकाळी हृदय स्तोत्र मंत्रस्य श्रीमहाकाल ऋषिः उष्णिक् छंदः श्रीदक्षिणकाळिका देवता क्रीं बीजं ह्रीं शक्तिः नमः कीलकं सर्वपापक्षयार्थे जपे विनियोगः ||

करन्यासः –
ॐ क्रां अंगुष्ठाभ्यां नमः |
ॐ क्रीं तर्जनीभ्यां नमः |
ॐ क्रूं मध्यमाभ्यां नमः |
ॐ क्रैं अनामिकाभ्यां नमः |
ॐ क्रौं कनिष्ठिकाभ्यां नमः |
ॐ क्रः करतलकरपृष्ठाभ्यां नमः |

हृदयादि न्यासः –
ॐ क्रां हृदयाय नमः |

ॐ क्रीं शिरसे स्वाहा |
ॐ क्रूं शिखायै वषट् |
ॐ क्रैं कवचाय हुं |
ॐ क्रौं नेत्रत्रयाय वौषट् |
ॐ क्रः अस्त्राय फट् |

ध्यानं –
ध्यायेत्काळीं महामायां त्रिनेत्रां बहुरूपिणीं |
चतुर्भुजां ललज्जिह्वां पूर्णचंद्रनिभाननां || 1 ||

नीलोत्पलदळप्रख्यां शत्रुसंघविदारिणीं |
वर मुंडं तथा खड्गं मुसलं वरदं तथा || 2 ||

बिभ्राणां रक्तवदनां दंष्ट्राळीं घोररूपिणीं |
अट्टाट्टहासनिरतां सर्वदा च दिगंबरां || 3 ||

शवासनस्थितां देवीं मुंडमालाविभूषितां |
इति ध्यात्वा महादेवीं ततस्तु हृदयं पठेत् || 4 ||

अथ हृदय स्तोत्रं |
काळिका घोररूपाढ्या सर्वकामफलप्रदा |
सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे || 5 ||

ह्रीं ह्रीं स्वरूपिणी श्रेष्ठा त्रिषुलोकेषु दुर्लभा |
तव स्नेहान्मयाख्यातं न देयं यस्य कस्यचित् || 6 ||

अथ ध्यानं प्रवक्ष्यामि निशामय परात्मिके |
यस्य विज्ञानमात्रेण जीवन्मुक्तो भविष्यति || 7 ||

नागयज्ञोपवीतां च चंद्रार्धकृतशेखरां |
जटाजूटां च संचिंत्य महाकालसमीपगां || 8 ||

एवं न्यासादयः सर्वे ये प्रकुर्वंति मानवाः |
प्राप्नुवंति च ते मोक्षं सत्यं सत्यं वरानने || 9 ||

यंत्रं शृणु परं देव्याः सर्वाभीष्टप्रदायकं |
गोप्याद्गोप्यतरं गोप्यं गोप्याद्गोप्यतरं महत् || 10 ||

त्रिकोणं पंचकं चाष्टकमलं भूपुरान्वितं |
मुंडपंक्तिं च ज्वालं च काळीयंत्रं सुसिद्धिदं || 11 ||

मंत्रं तु पूर्वं कथितं धारयस्व सदा प्रिये |
देव्या दक्षिणकाळ्यास्तु नाम मालां निशामय || 12 ||

काळी दक्षिणकाळी च कृष्णरूपा परात्मिका |
मुंडमाली विशालाक्षी सृष्टिसंहारकारिणी || 13 ||

स्थितिरूपा महामाया योगनिद्रा भगात्मिका |
भगसर्पिः पानरता भगध्येया भगांगजा || 14 ||

आद्या सदा नवा घोरा महातेजाः कराळिका |
प्रेतवाहा सिद्धिलक्ष्मीरनिरुद्धा सरस्वती || 15 ||

नामान्येतानि सुभगे ये पठंति दिने दिने |
तेषां दासस्य दासोऽहं सत्यं सत्यं महेश्वरि || 16 ||

ॐ | काळीं कालहरां देवीं कंकाळीं बीजरूपिणीं |
कालरूपां कळातीतां काळिकां दक्षिणां भजे || 17 ||

कुंडगोळप्रियां देवीं स्वयंभू कुसुमे रतां |
रतिप्रियां महारौद्रीं काळिकां प्रणमाम्यहं || 18 ||

दूतीप्रियां महादूतीं दूतीयोगेश्वरीं परां |
दूतीयोगोद्भवरतां दूतीरूपां नमाम्यहं || 19 ||

क्रीं मंत्रेण जलं जप्त्वा सप्तधा सेचनेन तु |
सर्वेरोगाः विनश्यंति नात्र कार्या विचारणा || 20 ||

क्रीं स्वाहांतैर्महामंत्रैश्चंदनं साधयेत्ततः |
तिलकं क्रियते प्राज्ञैर्लोकोवश्यो भवेत्सदा || 21 ||

क्रीं हूं ह्रीं मंत्रजप्तैश्च ह्यक्षतैः सप्तभिः प्रिये |
महाभयविनाशश्च जायते नात्र संशयः || 22 ||

क्रीं ह्रीं हूं स्वाहा मंत्रेण श्मशाने भस्म मंत्रयेत् |
शत्रोर्गृहे प्रतिक्षिप्त्वा शत्रोर्मृत्युर्भविष्यति || 23 ||

हूं ह्रीं क्रीं चैव उच्चाटे पुष्पं संशोध्य सप्तधा |
रिपूणां चैव चोच्चाटं नयत्येव न संशयः || 24 ||

आकर्षणे च क्रीं क्रीं क्रीं जप्त्वाक्षतान् प्रतिक्षिपेत् |
सहस्रयोजनस्था च शीघ्रमागच्छति प्रिये || 25 ||

क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं च कज्जलं शोधितं तथा |
तिलकेन जगन्मोहः सप्तधा मंत्रमाचरेत् || 26 ||

हृदयं परमेशानि सर्वपापहरं परं |
अश्वमेधादियज्ञानां कोटि कोटि गुणोत्तरं || 27 ||

कन्यादानादि दानानां कोटि कोटिगुणं फलं |
दूतीयागादि यागानां कोटि कोटि फलं स्मृतं || 28 ||

गंगादि सर्वतीर्थानां फलं कोटिगुणं स्मृतं |
एकधा पाठमात्रेण सत्यं सत्यं मयोदितं || 29 ||

कौमारीस्वेष्टरूपेण पूजां कृत्वा विधानतः |
पठेत् स्तोत्रं महेशानि जीवन्मुक्तः स उच्यते || 30 ||

रजस्वलाभगं दृष्ट्वा पठेदेकाग्रमानसः |
लभते परमं स्थानं देवीलोके वरानने || 31 ||

महादुःखे महारोगे महासंकटके दिने |
महाभये महाघोरे पठेत् स्तोत्रं महोत्तमं |
सत्यं सत्यं पुनः सत्यं गोपयेन्मातृजारवत् || 32 ||

इति महाकौतूहलं नाम श्री दक्षिणकाळी हृदय स्तोत्रं |